**Kalika Prabha : Journal of Multidisciplinary Studies**
[ISSN:- 3021-9388 (Print)]
Published by Kalika Sanskrit Vidyapeeth (RMC) Nawalpur, Nepal
https//www.ksv.edu.np

# स्वरफलादेशे मात्रा–वर्णस्वरज्ञानविधिः

**पुरुषोत्तमभट्टराई (विद्यावारिधिः)**

*सहप्राध्यापकः, फलितज्योतिषविभागः, ने.सं.वि., वाल्मीकिविद्यापीठम्*

***Article History :*** *Received : 16th, Jan. 2026; Reviewed: 27th, March 2026; Accepted: 24th; June, 2026.*
***Corresponding Author*** *: Purushottam Bhattarai, PhD* ***E-mail :*** *pbhattarai35@yahoo.com*
***DOI :*** *https://doi.org/10.3126/kp.v4i1.97033* ***ORCID****: https://orcid.org/0009-0002-4498-9660*

**लेखसारः**

*स्वरफलादेशो हि फलादेशे फलितज्योतिषस्य स्वतन्त्रो भागः । देहस्वरविज्ञानाधारेण फलादेशाय जातकस्य जन्मकालिकेष्टसमयादीनामावश्यकता न भवति । नष्टजातकानां कृते पद्धतिरेषा वरदानरूपा मन्यते । कालस्वराधारेण फलादेशाय तु जातकस्य नाम्न आवश्यकता भवति । नाम्नि ये वर्णा भवन्ति तेषामाधारेण मात्रादयः स्वरा निर्धारिता भवन्ति । स्वरफलादेशे विशेषरूपेण पञ्चस्वराणामाधारेणाष्टौ नामजा स्वरास्तथा तज्जन्यफलपाककालज्ञानाय द्वादशवार्षिकादिस्वरा निश्चीयन्ते । स्वरशास्त्रसम्बद्धसिद्धान्तानुसारेण फलादेशाय विंशति स्वरचक्राणि स्वरशास्त्रज्ञैः कथितानि सन्ति तेष्वपि तज्ज्ञैर्मात्रास्वरचक्रस्य व्यापकता तथैव वर्णस्वरचक्रस्य महत्ता च वर्णिता दृश्यते ।*

**शब्दकुञ्जी** – अर्धचन्द्रचक्रम्, द्वित्रिकोणम, वर्णस्वरचक्रम्, मात्रास्वरचक्रम्, मातृका

## विषयपरिचयः

स्वरशास्त्रं हि ज्यौतिषशास्त्रस्यान्यतमं स्वरूपम् । तत्र स्वरशास्त्रे फलज्ञानार्थं पञ्चस्वराणामाधारेण निर्मितानि विविधानि स्वरचक्राणि वर्णितानि सन्ति । तेषु विशेषरूपेणाष्टौ स्वरचक्राणि प्रमुखानि प्रसिद्धानि च सन्ति । तानि नैसर्गिकस्वरचक्राणि कथ्यन्ते । एवमेव येषां स्वरचक्राणामाधारेण नैसर्गिकस्वरचक्रनिर्दिष्टफलानां पाककालविचारः क्रियते तानि कालस्वरचक्राणि कथ्यन्ते । तानि कालस्वरचक्राण्यप्यष्टौ सङ्ख्यकान्येव सन्ति । तथैव संयुक्तरूपेण स्वरफलज्ञानाय वर्णितान्यन्यानि चत्वारि चक्राण्यपि सन्ति यानि कालस्वरचक्रसम्बद्धान्येव । अतः कालस्वरचक्राणि द्वादशसङ्ख्यकानि मन्यन्ते । एवं समग्ररूपेण विंशतिः स्वरचक्राणि स्वरशास्त्रसम्बद्धेषु मौलिकग्रन्थेषु यत्रतत्र सर्वत्र वर्णितानि दृश्यन्ते । सम्प्रति नेपालेऽस्माकं देशे स्वरशास्त्राधारितफलादेशपरम्परायां शिथिलता जातेति सर्वैरनुभूतो विषयो वर्तते । स्वरफलादेशविषयकानुसन्धानात्मकाध्ययनाभाव एव समस्याभूतो विषयस्तथैवैतादृशी समस्यैवास्य लेखस्य प्रेरकभूता वर्तते । अतः प्रस्तुतसमस्यायां

केन्द्रीभूयात्र स्वरशास्त्रजिज्ञासुकान्नुपकर्तुं सम्यग्रूपेण मात्रास्वरज्ञानार्थं वर्णस्वरनिरूपणार्थञ्च लेखोऽयं लिखितोऽस्ति । लेखेऽस्मिन् विशेषरूपेण पञ्चस्वराणां निरूपणपूर्वकं तेषां व्यापकताविषये शास्त्रीयाभिमतं प्रस्तुत्य स्वरफलविवेचनायाधारभूतस्य मात्रास्वरचक्रं वर्णस्वरचक्रमिति प्रमुखस्वरचक्रद्वयस्य विश्लेषणं विहितमस्ति ।

## शोधविधिः

प्रस्तुतलेखलेखनक्रमे परम्परीण-वैज्ञानिकयोर्द्वयोरपि शोधविध्योरुपयोगो विहितोऽस्ति । तत्रापि मुख्यरूपेण वैज्ञानिकशोधविधेर्वर्णनात्मक-विश्लेषणात्मकपद्धत्योः प्रयोगः कृतोऽस्ति ।

### अध्ययनस्य सैद्धान्तिकाधाराः

स्वरफलादेशे मात्रास्वर-वर्णस्वरज्ञानविधिरिति विषयेऽनुसन्धानात्मकाध्ययनायाद्यपर्यन्तं न केनापि विदुषा निश्चितसैद्धान्तिकाधाराः प्रस्तुताः सन्ति । स्वरग्रन्थकारैस्तत्सम्बद्धटीकाकारैश्च यथासन्दर्भं स्वरफलादेशवैशिष्ट्यसम्बद्धा ये विषया प्रकाशितास्त एवात्राधाररूपा दृश्यन्ते । अतो लेखेऽस्मिन्नुपर्युक्ताः शोधविधयः पूर्वकार्यस्वरूपास्ते विषयाश्चैव सैद्धान्तिकाधाररूपेण सङ्गृहीताः सन्ति ।

## स्वरपरिचयः

सृष्ट्यादौ ब्रह्मणा मातृकायां अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, ए, ऐ, ओ, औ, अं, अः इति षोडशसङ्ख्यकाः स्वराः प्रोक्ताः सन्ति । तेषां मध्ये द्वावन्तिमौ अं अः इति स्वरौ त्याज्यौ भवतः । ऋ, ॠ, ऌ, ॡ इति चत्वारो नपुंसकाः स्वरा अपि त्याज्या भवन्ति । एवं अ, आ, इ, ई, उ, ऊ, ए, ऐ, ओ, औ इति दश स्वराः शेषा भवन्ति । तेषु द्विर्द्विकेषु एक एव स्वरो ग्राह्यो भवति । अतः स्वरशास्त्रे वासुदेव-श्री-रुद्र-सूर्य-चन्द्रप्रतीकरूपत्वान्मात्राक्रमप्रधानत्वाच्च अ, इ, उ, ए, ओ इति पञ्च ह्रस्वस्वरा गृह्यन्ते । अकारेण यत्फलं भवति तदेव फलमाकारेणापि भवतीति बोध्यम् । अस्तादिदोषाद्यद्यकारः पीडितो भवति तदाकारोऽपि पीडित एव भवतीति बोद्धव्यम् । एवमिकारादिष्वपि ह्रस्वस्वरसम्बद्धं यत् फलं तदेव दीर्घस्वरेऽपि भवतीति बोध्यम् ।

एषां स्वराणामुदये लाभालाभप्रश्ने लाभोऽलाभो वा स्वरावस्थाधारेण पृथक् पृथग् वक्तव्यः । सुखासुखप्रश्ने सुखं दुःखञ्च, रोगादिना जीवितमरणप्रश्ने जीवितं मरणञ्च विन्द्यात् । अकारादिभिर्मातृकाभिर्विना केऽपि वर्णा उच्चारयितुं न शक्याः । मातृकाभिः सर्वं व्याप्तं वर्तते । सर्वेषां नामग्रहणक्रमे वर्णोच्चारणेऽपि स्वरा एव सहायका भवन्ति । स्वरान् विना सर्वे वर्णा निष्प्रभावा भवन्ति । अत एव सर्वत्रैव प्रश्नेऽपि स्वरा एव फलप्रकाशका भवन्ति ।

अकाराद्याः पञ्च स्वरा ब्रह्मादयः पञ्च देवता अर्थाद् ब्रह्म-विष्णु-रूद्र-चन्द्र-सूर्यात्मकाः क्रमेण ज्ञेयाः । पृच्छकानां प्रश्नानामुत्तरणक्रमे प्रश्नकाले यः स्वरोदयस्तं दैवतं ध्यायेदर्थात् स्वराणामुदयाधारेण प्रयोजनकर्त्रा सम्बद्धदैवतं ध्यात्वा सम्बद्धकर्म कार्यम् । तत एव निवृत्ति-प्रतिष्ठा-विद्या-शान्त्यतिशान्त्यय इति पञ्चकला निर्धायन्ते । यात्राप्रश्नेऽकारस्योदयश्चेत्तदा पान्थस्य निवर्तनं स्यादिति वक्तव्यम् । एवमेव प्रतिष्ठाप्रश्न इकारस्योदयश्चेत्तदा प्रतिष्ठा वाच्या । तथैव विद्यासम्बद्धप्रश्न उकारस्योदये

विद्याप्राप्तिर्भवतीति वक्तव्यम्। शान्तिप्रश्न एकारस्योदये शुभं वदेत्। ओकारोदये अतिशान्तिर्वक्तव्या। अतिशान्तिरिति मुक्तेरपरं नाम। एवं कार्यसिद्धयर्थं स्वरसम्बद्धान् ब्रह्मादिदेवान् ध्यात्वा तत्तत्कार्यं विधेयम्। तत्रैवेच्छा-ज्ञान-प्रभा-श्रद्धा-मेधा इति शक्तिपञ्चकं स्थितं भवति। तेषामुदये तदाश्रितस्योदयो ज्ञातव्यः। एवमेव पञ्चस्वराणामाधारेणैव चतुरस्रम्, अर्धचन्द्रम् त्रिकोणम्, षट्कोणम्, वर्तुलमिति पञ्चसङ्ख्यका मायाद्याश्चक्रभेदाः, धरादिपञ्चमहाभूतानि (पृथ्वी, जलम्, तेजः, वायुः, आकाश इति पञ्च महाभूतानि) तत्सम्बद्धा गन्ध-रस-रूप-स्पर्श-शब्दाः पञ्च विषयाः, शोषण-मोहन-दीपन-सन्तापन-प्रमथानुरूपाः पञ्च कामबाणा निष्पद्यन्ते। तत्तत्स्वरोदयो जनः सम्बद्धचक्रपूजनपूर्वकं ग्रहणं कुर्यात्। यथा- यस्य कृते चतुरस्रं चक्रं ग्राह्यमस्ति तेनाकारोदये सति पूजनं ग्रहणञ्च कर्तव्यम्। तथैवेकारादिषूदयेष्वर्धचन्द्रादिचक्राणि पूजितव्यानि ग्राह्याणि च। अर्थाद् यस्य कृतेऽर्धचन्द्रचक्रं ग्राह्यमस्ति तेनेकारोदये सति पूजनं ग्रहणञ्च कर्तव्यम्। यस्य कृते त्रिकोणचक्रं ग्राह्यमस्ति तेनोकारोदये सति पूजनं ग्रहणञ्च कर्तव्यम्। यस्य कृते षट्कोणचक्रं ग्राह्यमस्ति तेनैकारोदये सति पूजनं ग्रहणञ्च कर्तव्यम्। यस्य कृते वर्तुलचक्रं ग्राह्यमस्ति तेनौकारोदये सति पूजनं ग्रहणञ्च कर्तव्यम्। प्रश्नकाले धरादिपञ्चमहाभूतसम्बद्धस्वराणामुदये क्रमेण पृथ्वीगत-जलगताग्निगत-वायुगतोर्ध्वगतप्रश्नाः भवन्तीति प्रश्नशास्त्रज्ञैर्विचारणीयम्। तेऽपि गन्धादिविषयका भवन्ति। अर्थाद् अकारो गन्धविषयको भवति। इकारो रसविषयको भवति। उकारो रूपविषयको भवति। एकारः स्पर्शविषयको भवति। ओकारः शब्दविषयको भवति। अकारादीनां स्वराणामुदयाधारेण तत्तदुक्तप्रश्नविषये शुभाशुभं वक्तव्यम्। पिण्डस्यार्थात् शरीरस्य तत्त्वस्वरूपज्ञानमेव रूपातीतं कथ्यते। रूपातीतस्यातिक्रमणं निरञ्जनं शून्यं वा कथ्यते। प्रत्येकं स्वराणां बाल-कुमार-युवा-वृद्ध-मृत(शून्य)ावस्थान्सारेण क्रमेण पिण्ड-पद-रूप-रूपातीत-निरञ्जसंज्ञाश्च भवन्ति। एताः पञ्चावस्था जीवधारिणामपि भवति। स्वरज्ञानं परमार्थज्ञानस्य साधनरूपं मन्यते। वेदान्तदर्शनशास्त्रानुसारेण पञ्चमहाभूतानां पञ्चीकरणेन यथा ब्रह्मप्राप्तिर्भवति तथैव योगाभ्यासेन गुरुकृपया च ज्यौतिषशास्त्रान्तर्गतस्य रहस्यपूर्णभूतस्य स्वरशास्त्रस्य ज्ञानं भवति येन परमार्थप्राप्तिः सम्भवति। अतः स्वरभेदसंज्ञकामिमां गुरूमुखादेवापेक्षितं भवति नान्यतः। कथितस्वरसम्बद्धानि तद्गतवैशिष्ट्यप्रकाशकानि प्रमाणवचनानि च यथा-

अथातः सम्प्रवक्ष्यामि ख्यात ये ब्रह्यामले

मात्रादिभेदभिन्नानं स्वराणां षोडशोदयान्॥

मातृकायां पुरा प्रोक्ताः स्वराः षोडशसंख्यया।

अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, ए, ऐ, ओ, औ, अं, अः।

तेषां द्वावन्तिमौ (अं, अः) त्याज्यौ चत्वारश्च (ऋ ॠ ऌ ॡ) नपुंसकाः॥

शेषा दश स्वरास्तेषु स्यादेकैको द्विके द्विके।

ज्ञेयास्तत्र स्वरा आद्या ह्रस्वाः (अ, इ, उ, ए, ओ) पञ्च स्वरोदये॥

लाभालाभं सुखं दुःखं जीवितं मरणं तथा।

जयः पराजयश्चेति सर्वं ज्ञेयं स्वरोदये ॥

स्वरादिमात्रिकोच्चारो मातृव्याप्तं जगत्त्रयम् ।

तस्मात्स्वरोद्भवं सर्वं त्रैलोक्यं सचराचरम् ॥

अकाराद्याः स्वराः पञ्च ब्रह्मद्याः पञ्चदेवताः ।

निवृत्याद्याः कालाः पञ्च इच्छाद्याः शक्तिपञ्चकम् ॥

मायाद्याश्चक्रभेदाश्च धराद्यं भूतपञ्चकम् ।

शब्दादिविषयास्ते च कामबाणा इतीरिताः ।

पिण्डं पदं तथा रूपं रूपातीतं निरञ्जनम्

स्वरभेदस्थितं ज्ञानं ज्ञायते गुरूतः सदा ॥

(नरपतिजयचर्यास्वरोदयः, २।१-८ श्लोकाः)

स्वरज्ञानं सर्वश्रेष्ठं धनं मन्यते । स्वरज्ञानादतिरिक्तं धनमासंसारे किमपि नास्ति । स्वरज्ञस्तु केवलं स्वस्य कृते न अपि तु तत्रस्थानां सर्वेषामपि जनानां परामर्शद्वाराकार्यसिद्ध्यर्थं सहयोगं करोति । सिद्धे कार्ये सर्वे सन्तुष्टा धनिनश्च भवन्ति ।

स्वरज्ञानी नरो यत्र धनं नास्ति ततः परम् ।

गम्यते स्वरज्ञानेन ह्यनायासं फलं भवेत् ॥ (शिवस्वरोदयः, २१४ श्लोकः)

सम्प्रति नेपाले स्वरफलादेशस्य परम्परायां शिथिलता दृष्टेति सर्वे कथयन्ति परं प्राचीनकालेऽत्रस्थैर्दैवज्ञैः स्वराधारेण स्वरचक्राणामाधारेण च फलादेशं कुर्वन्ति स्म (भट्टराई, वि.सं. २०६६, ७-१२ पृष्ठेषु तथैव २०८०, २४०-२४३ पृष्ठेषु) । स्वरशास्त्रस्य पठनपाठनपरम्परा चासीत् (पन्तः, वि.सं. २०४३, पृष्ठम् ४७८)

## स्वरचक्रम्

स्वराणामाधारेण निर्मितं यच्चक्रं तदेव स्वरचक्रं कथ्यते । स्वरफलादेशे शुभाशुभफलनिरूपणार्थं स्वरचक्राणामुपयोगो विधीयते । तत्र स्वरशास्त्रे फलज्ञानार्थं विविधानि स्वरचक्राणि प्रयुज्यन्ते । तेषां स्वरचक्राणां सङ्ख्या विंशतिः परिमिताः सन्ति । तेषु विशेषरूपेणाष्टौ स्वरचक्राणि प्रमुखानि प्रसिद्धानि च सन्ति । मात्रास्वरचक्रम्, वर्णस्वरचक्रम्, ग्रहस्वरचक्रम्, जीवस्वरचक्रम्, राशिस्वरचक्रम्, नक्षत्रस्वरचक्रम्, पिण्डस्वरचक्रम्, योगस्वरचक्रञ्चेत्यष्टौ स्वरचक्राणि नैसर्गिकस्वरचक्राणि कथ्यन्ते । राशिस्वरचक्रस्य स्वरूपद्वयं प्राप्यते । नरपतिकविना नवमांशसङ्ख्याधारेण राशिस्वरचक्रं वर्णितं (नरपतिजयचर्यास्वरोदयः, सुबोधिनीसंस्कृतटीकायुतः २।२०-२२ जयलक्ष्मी-प्रज्ञावर्धिनीसंस्कृतटीकायुतः, २।२५-२७ श्लोकाः) परं सोमयाजिना रामचन्द्रेण राशीनां स्वामित्वाधारेण (समरसारम्, १७ श्लोकः) । एवमेव येषां स्वरचक्राणामाधारेण नैसर्गिकस्वरचक्रनिर्दिष्टफलानां पाककालविचारः क्रियते तानि कालस्वरचक्राणि

कथ्यन्ते । द्वादशवार्षिकस्वरचक्रम्, वार्षिकस्वरचक्रम्, अयनस्वरचक्रम्, ऋतुस्वरचक्रम्, मासस्वरचक्रम्, पक्षस्वरचक्रम्, दिनस्वरचक्रम्, घटीस्वरचक्रञ्चेत्यष्टौ स्वरचक्राणि कालस्वरचक्राणि कथ्यन्ते । तथैव संयुक्तरूपेण स्वरफलज्ञानाय वर्णितं तिथि-वार-नक्षत्रजन्यस्वरचक्रम्, युद्धादिषु फलज्ञानार्थं वर्णितं दिक्स्वरचक्रम्, तात्कालिकस्वरचक्रम्, दिनफलस्वरचक्रञ्चेति चत्वारि चक्राण्यपि कालस्वरचक्रसम्बद्धान्येव । अतो समग्ररूपेण द्वादशसङ्ख्यकानि कालस्वरचक्राणि मन्यन्ते । एवं विंशतिः स्वरचक्राणि स्वरशास्त्रसम्बद्धेषु मौलिकग्रन्थेषु यत्रतत्र सर्वत्र वर्णितानि दृश्यन्ते । यथा-

यामलेषु च सर्वेषु यान्युक्तानि स्वरोदये ।
विंशतिः स्वरचक्राणि वक्ष्येऽहं तानि चाधुना ॥
मात्रा वर्णो ग्रहो जीवो राशिर्भं पिण्डयोगकौ ।
द्वादशाब्दं तथाब्दं च अब्दार्धमृतुमासिकम् ॥
पक्षाहर्नाडिकं चक्रं तिथिवारर्क्षयोगकम् ।
दिशि तत्त्वावधानं च दिनफलं च वदाम्यहम् ॥

(नरपतिजयचर्यास्वरोदयः, सुबोधिनीसंस्कृतटीकायुतः, शास्त्रसंग्रहाध्यायः, १७-१९ श्लोकाः)

यामलेषु च सर्वेषु यान्युक्तानि स्वरोदये ।
विंशतिः स्वरचक्राणि वक्ष्येऽहं तानि चाधुना ॥
मात्रा वर्णो ग्रहो जीवो राशिर्भं पिण्डयोगकौ ।
द्वादशाब्दं तथाब्दं च अब्दार्धमृतुमासिकम् ॥
पक्षाहर्नाडिकं चक्रं तिथिवारर्क्षयोगकम् ।
तत्कालेन्दुफलं काष्ठास्वरं देहोद्भवं तथा ॥

(नरपतिजयचर्यास्वरोदयः, जयलक्ष्मीसंस्कृतटीकायुतः, शास्त्रसंग्रहाध्यायः, २०-२२ श्लोकाः)

**मात्रास्वरज्ञानम्**

स्वरशास्त्रे वर्णितेष्वष्टौ नैसर्गिकस्वरचक्रेषु मात्रास्वरचक्रमप्यन्यतमं वर्तते । अकारादीनां पञ्चस्वराणां मात्रादयोऽष्टौ भेदा भवन्ति मात्रास्वरचक्रम्, वर्णस्वरचक्रम्, ग्रहस्वरचक्रम्, जीवस्वरचक्रम्, राशिस्वरचक्रम्, नक्षत्रस्वरचक्रम्, पिण्डस्वरचक्रम्, योगस्वरचक्रञ्चेति । येन नाम्ना मनुष्यो प्रसुप्तोऽपि भासते, तथैव येन नाम्ना शब्दित आगच्छति तस्मिन् नाम्नि तत्र प्रथमवर्णे या मात्रा विद्यमानास्ति तस्य मनुष्यस्य स एव मात्रास्वर इति । यथा-

अकाराद्याः स्वराः पञ्च तेषामष्टविधास्त्वमी ।

मात्रा वर्णो ग्रहो जीवो राशिर्भं पिण्डयोगकौ ॥

प्रसुप्तो बुध्यते येन येनागच्छति शब्दितः ।

तत्र नामाद्यवर्णे या मात्रा मात्रास्वरः स हि ॥

(नरपतिजयचर्यास्वरोदयः, २।९-१० श्लोकौ)

विविधसंज्ञाभिः सह सरलरूपेणैव पञ्चस्वराणां वैशिष्ट्यज्ञानार्थं मात्रास्वरचक्रमधोभागे प्रदर्शितमस्ति, यथा-

**मात्रास्वरचक्रम्**

| बालः | कुमारः | युवा | वृद्धः | मृतः | अवस्था |
|---|---|---|---|---|---|
| अ | इ | उ | ए | ओ | **स्वराः** |
| क | कि | कु | के | को | **वर्णाः** |
| ख | खि | खु | खे | खो | ,, |
| ग | गि | गु | गे | गो | ,, |
| घ | घि | घु | घे | घो | ,, |
| च | चि | चु | चे | चो | ,, |
| छ | छि | छु | छे | छो | ,, |
| ज | जि | जु | जे | जो | ,, |
| झ | झि | झु | झे | झो | ,, |
| ट | टि | टु | टे | टो | ,, |
| ठ | ठि | ठु | ठे | ठो | ,, |
| ड | डि | डु | डे | डो | ,, |
| .ढ | ढि | ढु | ढे | ढो | ,, |
| त | ति | तु | ते | तो | ,, |
| थ | थि | थु | थे | थो | ,, |
| द | दि | दु | दे | दो | ,, |
| ध | धि | धु | धे | धो | ,, |
| न | नि | नु | ने | नो | ,, |
| प | पि | पु | पे | पो | ,, |
| फ | फि | फु | फे | फो | ,, |
| ब | बि | बु | बे | बो | ,, |
| भ | भि | भु | भे | भो | ,, |
| म | मि | मु | मे | मो | ,, |

| | | | | | |
|---|---|---|---|---|---|
| य | यि | यु | ये | यो | ,, |
| र | रि | रू | रे | रो | ,, |
| ल | लि | लु | ले | लो | ,, |
| व | वि | वु | वे | वो | ,, |
| श | शि | शु | शे | शो | ,, |
| ष | षि | षु | षे | षो | ,, |
| स | सि | सु | से | सो | ,, |
| ह | हि | हु | हे | हो | ,, |
| ब्रम्हा | विष्णुः | रूद्रः | सूर्यः | चन्द्रः | देवताः |
| निवृत्ति | प्रतिष्ठा | विद्या | शान्तिः | अतिशान्तिः | कलाः |
| इच्छा | ज्ञान | प्रभा | श्रद्धा | मेधा | शक्तयः |
| चतुरस्रम् | अर्धचन्द्रम् | त्रिकोणम् | षट्कोणम् | वर्तुलम् | चक्राणि |
| पृथ्वी | जलम् | तेजः | वायुः | आकाशम् | पञ्चभूतानि |
| गन्धः | रसः | रूपम् | स्पर्शः | शब्दः | विषयाः |
| पिण्डम् | पदम् | रूपम् | रूपातीतम् | निरञ्जनम् | संज्ञाः |

उपरि प्रदर्शितस्य चक्रस्याधारेणैव यस्य कस्यापि जनस्य मात्रास्वरज्ञानं क्रियते । यथा- सत्यव्रतस्य मात्रास्वरज्ञानं कर्तव्यमस्ति । तत्र **सत्यव्रत** इति नाम्नि नाम्नः प्रथमे वर्णेऽकारो वर्तते । अतः सत्यव्रतस्य मात्रास्वर **अ** इति वर्तते । तथैव मेदिनी इत्यस्या मात्रास्वरज्ञानं कर्तव्यमस्ति । **मेदिनी** इति नाम्नि नाम्नः प्रथमे वर्ण एकारो वर्तते । अतो मेदिनी इत्यस्या मात्रास्वर **ए** इति वर्तते । एवं सर्वेषां जनानां नाम्नामाद्यवर्णस्थमात्राधारेण मात्रास्वरा ज्ञातव्या भवन्ति ।

**वर्णस्वरज्ञानम्**

स्वरशास्त्रे वर्णितेष्वष्टौ नैसर्गिकस्वरचक्रेषु वर्णस्वरचक्रमप्यन्यतमं वर्तते । तस्य कृते कादितो हकारपर्यन्तान् ङञणोज्झितान् वर्णान् तिर्यक्पङ्क्तिक्रमेण पञ्चत्रिंशत्प्रकोष्ठके लिखेत् । तत्रोर्ध्वभागे अ, इ, उ, ए, ओ एते पञ्चस्वराः स्थाप्याः । नरनामादिमो वर्णो यस्य स्वरस्याधोभागे वर्तते स स्वरस्तस्य कृते वर्णस्वरो भवति । नामादौ नक्षत्राणां चरणस्थवर्णानुसारेण यदि ङ-ञ-ण-वर्णा भवेयुश्चेत्तदा ते वर्णा ग्राह्या न भवन्ति । तेषां स्थाने क्रमेण ग-ज-ड-वर्णा ग्राह्या भवन्ति । एवमेव नाम्नि यदि संयुक्ताक्षरलक्षणं दृश्यते तदादिमो वर्णो ग्राह्यो भवतीति ब्रह्मयामलमतं वर्तते । यथा-

कादिहान्तं लिखेद्वर्णान् स्वराधो ङञणोज्झितान् ।
(ककारादिहकारान्ताल्लिखेद्वर्णान्स्वराधो ङञणोज्झितान्)
तिर्यक्पंक्तिक्रमेणैव पञ्चत्रिंशत्प्रकोष्ठके ॥
नरनामादिमो वर्णो यस्मात्स्वरादधः स्थितः ।

स स्वरस्तस्य वर्णस्य वर्णस्वर इहोच्यते ॥
न प्रोक्ता ङञणा वर्णा नामादौ सन्ति ते नहि ।
चेद् भवन्ति तदा ज्ञेया गजडास्ते यथाक्रमम् ॥
यदि नाम्नि भवेद्वर्णः संयुक्ताक्षरलक्षणः ।
ग्राह्यस्तदादिमो वर्ण इत्युक्तं ब्रह्मयामले ॥

(नरपतिजयचर्यास्वरोदयः, २।११-१४ श्लोकाः)

वर्णस्वरचक्रं यथा-

| **स्वराः** | **अ** | **इ** | **उ** | **ए** | **ओ** |
|---|---|---|---|---|---|
| **वर्णाः** | क | ख | ग | घ | च |
| ,, | छ | ज | झ | ट | ठ |
| ,, | ड | ढ | त | थ | द |
| ,, | ध | न | प | फ | ब |
| ,, | भ | म | य | र | ल |
| ,, | व | श | ष | स | ह |

एतेषामुपर्युक्तानां कथितस्वराणां बालाद्याः पञ्चाबस्थाः, उदिताद्याः पञ्चावस्थाः, जन्माद्याः पञ्चावस्थाश्च भवन्ति । यथा- सत्यव्रतस्य वर्णस्वरज्ञानं कर्तव्यमस्ति । तत्र **सत्यव्रत** इति नाम्नि नाम्नः प्रथमो वर्णः सकारो वर्तते । वर्णस्वरचक्रे सवर्णस्योर्ध्वभागे ए-स्वरो वर्तते । अतः सत्यव्रतस्य वर्णस्वर ए इति । तस्यैव बालः, उदितो जन्म एते अवस्थाश्च भवन्ति । तथैव मेदिनी इत्यस्या वर्णस्वरज्ञानं कर्तव्यमस्ति । **मेदिनी** इति नाम्नि नाम्नः प्रथमो वर्णो मकारो वर्तते । वर्णस्वरचक्रे मवर्णस्योर्ध्वभाग इ-स्वरो वर्तते । अतो मेदिनी इत्यस्या वर्णस्वर **इ** इति वर्तते । एवं सर्वेषां जनानां नाम्नामाद्यवर्णाधारेण वर्णस्वरा ज्ञातव्या भवन्ति ।

## निष्कर्षः

फलादेशकरणे प्राचीनाचार्यैर्विकसिता विविधाः पद्धतयो दृश्यन्ते । ताः सर्वा मिथः परिपूरका भवन्ति न तु विरोधिन्यः । देहस्वरविज्ञानं कालस्वरविज्ञानञ्चेति स्वरशास्त्रस्य प्रमुखौ विभागौ मन्येते । देहस्वरविज्ञाने सम्बद्धजनानां शरीरस्थस्वरोदयविचारपूर्वकं देहगतप्रमुखाभिरिडापिङ्गलासुषुम्णाभि- र्नाडीभिर्देहजन्यशुभाशुभलक्षणविचारः क्रियते चेत् कालस्वरविज्ञाने फलादेशकरणाय विविधानां स्वरचक्राणामुपयोगो विधीयते । तदनुसारेण फलविश्लेषणाय स्वरनिर्धारणपूर्वकं स्वरचक्रज्ञानं परममावश्यकं भवति । स्वरशास्त्राधारेण फलादेशाय स्वरेषु प्रमुखानां पञ्चस्वराणामवस्थावशाज्जायमानानि स्वरचक्राण्यष्टौ सन्ति । तानि नैसर्गिकस्वरचक्राणि कथ्यन्ते । तथैव तेषामाधारेण प्राप्तव्यशुभाशुभफलानां प्रभावकालज्ञानाय निर्धारितानि तत्समसङ्ख्यकानि कालस्वरचक्राणि तदतिरिक्तानि तत्सम्बद्धानि चत्वारि चक्राणि चैकीकृत्य समग्ररूपेण द्वादशसङ्ख्यकानि कालस्वरचक्राणि पूर्वाचार्यैर्वर्णितानि सन्ति । एवं समग्ररूपेण विंशति स्वरचक्राणि स्वरफलादेशे प्रयुज्यन्ते । तेष्वपि मात्रास्वरचक्रस्य वर्णस्वरचक्रस्य च सर्वव्यापकता स्वरशास्त्रज्ञैः स्वीकृता । एतच्चक्रद्वयेऽपि

वर्णस्वरचक्रस्य सर्वव्यापकता दृश्यते यथा जातकशास्त्रे लग्नकुण्डल्या । अतः स्वरफलवेदिभिः सर्वप्रथमं जयपराजयज्ञानाय मात्रास्वरचक्रस्य वर्णस्वरचक्रस्य च ज्ञानं कर्तव्यं भवति ।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञगुरुभ्योऽन्येभ्यः सहयोगिभ्यश्च हार्दं कार्तज्ञ्यं व्यनज्मि ।

## सन्दर्भसूची

*गोरखाको इतिहास* (दोस्रो भाग, दिनेशराज पन्त, वि.सं. २०४३), काष्ठमण्डपम्, दिनेशराजपन्तः ।

*दैवज्ञशिरोमणिलक्ष्मीपतिना प्रणीतानां ग्रन्थानां सूचीपत्रम्* (पुरुषोत्तमभट्टराई, पूर्णिमा, १४६ पूर्णाङ्काः, पृष्ठसंख्याः, २१५–२८०, वि.सं.२०८० पौषः) काष्ठमण्डपम्, संशोधन–मण्डलम् ।

*नरपतिजयचर्यास्वरोदयः* (नरपतिकविः, संस्कृत–हिन्दी–व्याख्योपेतः, व्याख्याकारः, गणेशदत्तपाठकः, च.सं., वि.सं. २०५६), वाराणसी, चौखम्बा–संस्कृत–संस्थानम् ।

*नरपतिजयचर्यास्वरोदयः* (नरपतिः, जयलक्ष्मी–प्रज्ञावद्र्धिनीटीका, सन्येन्द्र–मिश्रः, वि.सं.२०८०) वाराणसी, चौखम्बा–सुरभारती–प्रकाशनम् ।

*नरपतिजयचर्यास्वरोदयः* (जयलक्ष्मीटीकोपेतः, अप्रकाशितपाण्डुलिपिः),काष्ठमण्डपम्, राष्ट्रिय–अभिलेखालयः ।

*शिवस्वरोदयः* (केशवप्रियाभाषाटीकासहितः, व्याख्याकार, पं. अभय–कात्यायन, वि.सं. २०६२), वाराणसी, चौखम्बा–सुरभारती–प्रकाशनम् ।

*शिवस्वरोदयः* (स्वरप्रभा भाषाटीका, अनु. पं. हरेकृष्ण शास्त्री, वि.सं.२०७०), वाराणसी, रुपेश ठाकुरप्रसादप्रकाशनम् ।

*समरसारम्* (रामवाजपेयी, टीकाकारः, हनुमान् शर्मा, वि.सं. २०४३), बंबई, श्रीबेंकटेश्वरप्रेसः ।

*समरसारटीका* (रामवाजपेयी, टीकाकारः, लक्ष्मीपतिपाँडे, अप्र.पाण्डुलिपिः), काष्ठमण्डपम्, संशोधनमण्डलम् ।

*स्वरशास्त्रको प्रयोजन, महत्त्व र उपयोगिता* (पुरुषोत्तमभट्टराई, पञ्चाङ्ग–भास्कर, पृष्ठसख्या ७–१२, अङ्क १, वि.सं.२०६६), काष्ठमण्डपम्, नेपाल–पञ्चाङ्ग–निर्णायक–समितिः ।